श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टाशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टाशीतितमः सर्गः ॥

## इलाबुधयोर्मिथो दर्शनं बुधेनेलासहचरीणां किम्पुरुषीति नाम विधाय पर्वतेऽवस्थानाय प्रेषणम्

तां कथामैलसम्बद्धां रामेण समुदीरिताम्।
लक्ष्मणो भरतश्चैव श्रुत्वा परमविस्मितौ ॥ **7.88.1** ॥

तौ रामं प्राञ्जली भूत्वा तस्य राज्ञो महात्मनः।
विस्तरं तस्य भावस्य तदा पप्रच्छतुः पुनः ॥ **7.88.2** ॥

कथं स राजा स्त्रीभूतो वर्तयामास दुर्गतिः।
पुरुषः स यदा भूतः कां वृत्तिं वर्तयत्यसौ ॥ **7.88.3** ॥

तयोस्तद् भाषितं श्रुत्वा कौतूहलसमन्वितम्।
कथयामास काकुत्स्थस्तस्य राज्ञो यथागमम् ॥ **7.88.4** ॥

तमेव प्रथमं मासं स्त्री भूत्वा लोकसुन्दरी।
ताभिः परिवृता स्त्रीभिर्येऽस्य पूर्वं पदानुगाः ॥ **7.88.5** ॥

तत्काननं विगाह्याशु विजह्रे लोकसुन्दरी।
द्रुमगुल्मलताकीर्णं पद्भ्यां पद्मदलेक्षणा ॥ **7.88.6** ॥

वाहनानि च सर्वाणि सन्त्यक्त्वा वै समन्ततः।
पर्वताभोगविवरे तस्मिन् रेमे इला तदा ॥ **7.88.7** ॥

अथ तस्मिन् वनोद्देशे पर्वतस्याविदूरतः।
सरः सुरुचिरप्रख्यं नानापक्षिगणायुतम्॥ **7.88.8**॥

ददर्श सा इला तस्मिन् बुधं सोमसुतं तदा।
ज्वलन्तं स्वेन वपुषा पूर्णं सोममिवोदितम्॥ **7.88.9**॥

तपन्तं च तपस्तीव्रमम्भोमध्ये दुरासदम्।
यशस्करं कामकरं तारुण्ये पर्यवस्थितम्॥ **7.88.10**॥

सा तं जलाशयं सर्वं क्षोभयामास विस्मिता।
सह तैः पूर्वपुरुषैः स्त्रीभूतै रघुनन्दन॥ **7.88.11**॥

बुधस्तु तां समीक्ष्यैव कामबाणवशं गतः।
नोपलेभे तदात्मानं स चचाल तदाम्भसि॥ **7.88.12**॥

इलां निरीक्षमाणस्तु त्रैलोक्यादधिकां शुभाम्।
चित्तं समभ्यतिक्रामत् का न्वियं देवताधिका॥ **7.88.13**॥

न देवीषु न नागीषु नासुरीष्वप्सरःसु च।
दृष्टपूर्वा मया काचिद् रूपेणानेन शोभिता॥ **7.88.14**॥

सदृशीयं मम भवेद् यदि नान्यपरिग्रहः।
इति बुद्धिं समास्थाय जलात् कूलमुपागमत्॥ **7.88.15**॥

आश्रमं समुपागम्य ततस्ताः प्रमदोत्तमाः।
शब्दापयत धर्मात्मा ताश्चैनं च ववन्दिरे॥ **7.88.16**॥

स ताः पप्रच्छ धर्मात्मा कस्यैषा लोकसुन्दरी।
किमर्थमागता चैव सर्वमाख्यात मा चिरम्॥ **7.88.17**॥

शुभं तु तस्य तद् वाक्यं मधुरं मधुराक्षरम्।
श्रुत्वा स्त्रियश्च ताः सर्वा ऊचुर्मधुरया गिरा॥ **7.88.18**॥

अस्माकमेषा सुश्रोणी प्रभुत्वे वर्तते सदा।
अपतिः काननान्तेषु सहास्माभिश्चरत्यसौ ॥ **7.88.19** ॥

तद् वाक्यमव्यक्तपदं तासां स्त्रीणां निशम्य च।
विद्यामावर्तनीं पुण्यामावर्तयत स द्विजः ॥ **7.88.20** ॥

सोऽर्थं विदित्वा सकलं तस्य राज्ञो यथा तथा।
सर्वा एव स्त्रियस्ताश्च बभाषे मुनिपुङ्गवः ॥ **7.88.21** ॥

अत्र किम्पुरुषीभूत्वा शैलरोधसि वत्स्यथ।
आवासस्तु गिरावस्मिञ्शीघ्रमेव विधीयताम् ॥ **7.88.22** ॥

मूलपत्रफलैः सर्वा वर्तयिष्यथ नित्यदा।
स्त्रियः किम्पुरुषान्नाम भर्तॄन् समुपलप्स्यथ ॥ **7.88.23** ॥

ताः श्रुत्वा सोमपुत्रस्य स्त्रियः किम्पुरुषीकृताः।
उपासाञ्चक्रिरे शैलं वध्वस्ता बहुलास्तदा ॥ **7.88.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टाशीतितमः सर्गः ॥